# Ishvaraproktam Rudrakshamukhavarnanam

# ईश्वरप्रोक्तं रुद्राक्षमुखवर्णनम्

## Document Information

Text title : Ishvaraproktam Rudrakshamukhavarnanam

File name : IshvaraproktaMrudrAkShamukhavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshvarAkhyaH dashamAMshaH | adhyAyaH 23 | 23-39||

Latest update : September 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 9, 2024

*sanskritdocuments.org*

# ईश्वरप्रोक्तं रुद्राक्षमुखवर्णनम्

(शिवरहस्यान्तर्गते ईश्वराख्ये)

एकवक्रं तु रुद्राक्षं परब्रह्मस्वरूपकम् ।
तद्धारणात्परे तत्वे लीयते विजितेन्द्रियः ॥ २३॥

द्विवक्रं तु मुनिश्रेष्ठ अर्धनारीश्वरो भवेत् ।
धारणादर्धनारीशः प्रीयते तस्य नित्यशः ॥ २४॥

त्रिवक्रमनलः साक्षात् स्त्रीहत्यां हन्ति वै क्षणात् ।
त्रिमुखं चैव रुद्राक्षमग्नित्रयस्वरूपकम् ॥ २५॥

तदेव हि परं ब्रह्म नरहत्यां व्यपोहति ।
चतुर्मुखं तु रुद्राक्षं पितामहस्वरूपकम् ॥ २६॥

पञ्चवक्रं तु रुद्राक्षं पञ्चब्रह्मस्वरूपकम् ।
तस्य धारणमात्रेण सन्तुष्यति सदाशिवः ॥ २७॥

पञ्चवक्रः स्वयं रुद्रः कालाग्निर्नाम नामतः ।
अगम्यागमनं चैवमभक्ष्यस्य च भक्षकः ॥ २८॥

(अगम्यागमनाच्चैमभक्ष्यस्य भक्षणात्) ॥ २८॥

मुच्यते सर्वपापेभ्यः पञ्चवक्रस्य धारणात् ।
षड्वक्रमपि रुद्राक्षं कार्तिकेयाधिदैवतम् ॥ २९॥

विनायकाधिदैवं च प्रवदन्ति मनीषिणः ।
सप्तवक्रं तु रुद्राक्षं सप्तमं निधिदैवतम् ॥ ३०॥

सप्ताश्वदैवतं चैव सारसप्तकदैवतम् ।
तद्धारणान्महाश्रीः स्यान्महदारोग्यमुत्तमम् ॥ ३१॥

महाविज्ञानसम्पत्तिः शुचेर्धारयतः शनैः ।
अष्टवक्रं तु रुद्राक्षमष्टमूर्त्यधिदैवतम् ॥ ३२॥

वस्वष्टकप्रियं चैव गङ्गाप्रीतिकरं परम् ।
तद्धारणादिमे प्रीता भवेयुः सत्यवादिनः ॥ ३३॥

नववक्त्रं तु रुद्राक्षं नवशक्त्यधि दैवतम् ।
तस्य धारणमात्रेण प्रीणते  नवराशयः (नवशक्तयः) ॥ ३४॥

दशवक्त्रं तु रुद्राक्षं यमदेवमुदाहृतम् ।
दशांशप्रीतिजननं धारणे नात्र संशयः ॥ ३५॥

एकादशमुखं त्वक्षं रुद्रैकादशदैवतम् ।
तदिन्द्रदैवतं चाहुः सदा सौभाग्यवर्धनम् ॥ ३६॥

रुद्राक्षं द्वादशमुखं महाविष्णुस्वरूपकम् ।
द्वादशादित्यदैवं च बिभृयात्तत्परो नरः ॥ ३७॥

त्रयोदशमुखं चाक्षं कामदं सिद्धिदं शुभम् ।
तस्य धारणमात्रेण कामदेवः प्रसीदति ॥ ३८॥

चतुर्दशमुखं चाक्षं रुद्रनेत्रसमुद्भवम् ।
सर्वव्याधिहरं चैव सदारोग्यमवाप्नुयात् ॥ ३९॥

॥ इति शिवरहस्यान्तर्गते ईश्वरप्रोक्तं रुद्राक्षमुखवर्णनं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । ईश्वराख्यः दशमांशः । अध्यायः २३ । २३-३९॥

- .. shrIshivarahasyam . IshvarAkhyaH dashamAMshaH . adhyAyaH 23 . 23-39..

Notes:
Śiva शिव, following the episode of TripurāSaṃhāra त्रिपुरसंहार; outlines to Deva-s देवः, the salient features of Ekamukha एकमुख to Caturdashamukha चतुर्दशमुख Rudrākśa रुद्राक्ष.

Proofread by Ruma Dewan

*Ishvaraproktam Rudrakshamukhavarnanam*

pdf was typeset on September 9, 2024

Please send corrections to *sanskrit@cheerful.com*